देवेतेनविना अन्येपिअभिलषितसिद्धिर्नजायते॥ जातापिनशोभतेशोभितापिपरिणामेनसुखदाकथंचित्कस्यप्राप्तावपिपरलोक
हितायकदाचननभवति॥ तथाचश्रुतिः यःस्वांदेवतांअतियजतिइत्यादि॥ ७॥ बध्वारवङ्गांश्चंगेकपिलमुरुजटामंडलंपद्मयोनेः रु
त्वोदन्यान्समांगैःस्वजमुरसिशिरःशेखरंतार्क्ष्यपक्षैः॥ यादेवीमुक्तविश्वापिबतिजगदिदंसाद्रिभूपीठभूतंसादेवीनिष्कलंकाकलितनतुल
तापातुनःपातुनीयान्॥ वहत्स्वसृक्प्रवाहेषुमेदोगंधेविजृंभिते॥ दुःखितास्त्वंतथामासुःप्रत्येकममराइदं॥ हाकष्टंक्वगताएष्वीक्वगताज
लराशयः॥ क्वगताजनसंघाताःक्वगताधरणीधराः॥ तादृक्चंदनमंदारकदंबवनमंडितः॥ मेरुपःपुष्पराशीनांकष्टंक्वमलयोगतः॥ उच्चावदातावि
पुलाहिमवद्भूमयोपिताः॥ नीताःशोच्यारुषेवाश्रुधिरेणात्मपंकतां॥ क्वोंचद्वीपतलेक्वोंचेयोभूत्कल्पद्रुमोमहान्॥ ब्रह्मलोकतलच्छायः सो
पिपूर्णत्वमागतः॥ हासीरार्णवपारिजातकमलाचंद्रामृतानांपतेहादध्यर्णवनावनीतशिखरिप्रोद्भूतवेलावन॥ हामध्वर्णवनालिकेरगि २९

रिकेयोगश्वरीसेवितक्षेत्रानीसमुपोष्यधन्यवनितादिग्दर्पणत्वंगताः॥ हाकल्पद्रुमकोचनामलतलतानिःसंधिबंधाचलेक्वोंचद्वीपविरिंचिरं
सनलिनीनीरंप्रदिग्जालक॥ यातःक्वेहकदंबकाननदरीविस्रांतविद्याधरीक्रीडाकोविदनागरामरगृहंत्वंपुष्परद्वीपक॥ स्वादुदोदग्यता
पावलकुसुममहीपावनानांवनानांगोमेदद्वीपकल्पद्रुमकनकलतासुंदरीणांदरीणां॥ शाकद्वीपाचलानामरतरुचनेर्दीसितानांसितानांस्म
रेवोदेतिपुण्यंसुरपदसुखदंमानवानांनराणां॥ आवलयंतिनिरुंधंतीतिआवलानि॥ मेदानिलाचलितपल्लवबालवल्लीसंतानभासितसः
मस्तदिगंतराणि॥ ध्वस्तानितानिसकलानिवनानिकष्टमाश्वासमेष्यतिकथंजनतानजाने॥ कदानुतानीक्षरस्याब्धिनीरवनानिखंडाच
लभूमिकासु॥ इक्ष्वेमभूयोगुडामोदकानितथाकुमाराण्यपिशर्कराया॥ कुमाराणिक्रीडार्थाःपुत्रिकाः॥ कदंबकल्पद्रुमशीतलेषुतालीतमा
लीसवनाचलस्य॥ कदानुतच्चंदनसुंदरीणांपश्येयमन्तंकनकालयेषु॥ तालीतमालीभिःसुंदरस्यसवनपर्वतस्येत्यर्थः॥ गतानिकष्टम
रणीयरूपतांजंबूद्रुमस्याग्रफलानितान्यपि॥ येषांनदीद्वीपसमुद्रमेरवलावलत्यसौजंबुमहीरसांबुभिः॥ येषांफलानांरसांबुभिःप्रभ

वानदी॥सिक्तीध्वनीरंभ्रमहीधरंध्वनीवामरस्त्रीकृतगीतनृत्ये॥संस्मृत्यसंस्मृत्यस्करोदतीरंप्रागुद्भमूर्वीवृहदावदीर्य॥प्राक्प्रातःकाल
अब्जंपद्ममिवसंप्रत्युर्वीवचाहंहदा अवदीर्यविदारणंप्राप्तोभीत्यर्थः॥पश्यासृगंभस्मिनवार्णवमूर्भिभासासौवर्णपर्वतशताग्रशिखराः
कचेति॥संध्यारुणाउदयनास्तमयावनीनांस्तोकादितेंदुकलिकाइवदिग्मुखेषु॥तारक्सागरवारिराशिवलयाद्वीपांतरांतरालंहतास्रोचाद्रीद्रीनि
विष्टवारिदघटानीलोत्पलानांस्थली॥स्रोतोजंगलकाननोग्रनगरग्रामाग्रहारांबरानोजानेतरुपल्लवांकुरवतीकंठंकयातामही॥आयुर्वोयुवि
घट्टिताभ्रपटलीलोलांबुवद्गुरंभोगामेघवितानमध्यविलसत्सोदामिनीचंचलाः॥लोलायौवनलालनाजलरयःकायःक्षणापायवान्पुत्र
त्रासमुपेत्यसंसृतिवशान्निर्वापणमन्विष्यतां॥चित्रेमेषत्रिनेत्रोपिजार्णेतृणभिवार्णवे॥उत्सृतेहाहतविधेर्नाकार्यंनामविद्यते॥मत्तेभकुंभ
पीरणाहिनींकुंकुमोकेशच्याःपयोधरभेररतिखेदखिन्नः॥लग्नःसुखादिवकरेतितरंगदोलाःसंशीर्यमाणमणिगेहगतोत्रशक्रः॥अत्रास्मि
न्प्रलयांबुभेरलग्नःसन्सुखादिवरतिखेदापनयनायजलक्रीडासुखमुद्दिश्येवेत्यर्थः॥यंत्रोत्थेमहषदासदृशांबुरूपंक्षुब्धाद्रिभीमज २१

लवीचिशिखरेरितंरव॥व्यावर्ततेदिविदलाहृतकर्णिकास्तंध्यानेकनिष्पत्रमेत्रिसरोजमेतत्॥सरोजंप्राप्यव्यावर्ततेनांतरालेइत्यर्थः॥मेघार
वातिघनघुंघुमघोषभीमावीचीचयाःकनकपत्तनविद्युतोमी॥व्याप्तिभ्रमंतिगजवाजिमृगेंद्रनागवृक्षाद्रिकाननमहीतलतुल्यदेहाः॥उद्यमा
नारभूवीच्यामतसीकुसुमश्रियां॥यमोप्ययंयमेनेववारिपूरेणनीयते॥एतेवुडंतिसलिलेखिललोकपालानागानगेश्वनगरैःसहलक्षसंख्याः
॥लक्ष्म्याकरोदरगुहागतवारिपूरव्यावर्तनागुडगुडैरभिलक्ष्यपूराः॥लक्ष्म्याकरेषुपर्वतोदरगुहासु॥दुर्वारवारिवलनापरिपूरितेषुपातालभू
तलनभस्तलादिकृतेषु॥मत्स्याश्चवेंद्रयमयक्षसुरासुरौघाःसंग्रामपत्तनविमाननगाभ्रमंति॥उद्यमानस्यकृष्णस्यतनुरेवांबुरूपिणी॥मा
त्रजंघेववत्सस्यकष्टंबंधनतांगता॥अन्योन्यभावलयतामहोबुडबुडारवः॥श्रूयतेदेवदैत्यानांस्वस्त्रीहलहलाकुलः॥कोलाहलाकुलपुरोत्त
मवेगपातविक्षुब्धवारिपटलीवलितांबरासु॥दिक्कुंभमज्जालदजालघनास्विवैषसंलक्ष्यते॥जलमग्नःस्फुटकुड्यबंधः॥हाकष्टमेषतर
सापयसापनीतआवर्तवृत्तिपरिवर्तनयास्वधस्तात्॥एतेकुबेरयमनारदवासवाद्याःप्राणान्पयोभ्रपटलैर्विपुरास्यजंति॥एषःसर्वजनप्र

त्यक्षःसूर्यः॥प्राज्ञःप्रशांतजउदेतमिहोत्थमानंमानोज्झितोःशवतयैवचतद्वेति॥ब्रह्मेंद्रविष्णुपुरवंडकसेकटाबुसंघट्टनेनकटुकुट्टनदक्षुतेन॥ वासिष्ठ
स्त्रीणांगणोर्ईपरिपिष्टइहेतिकष्टकरुत्तातुमेनमपरःकुजउंसमर्थः॥नत्यंतकस्यदशनैरभिचर्व्यमाणांत्रातुंपरस्परमियंजननासमर्था॥पर्वत
प्रतिघसर्पसर्पणाःसंसरंतिविपुलाजलोच्चयाः॥तेषुनावइवदेवपत्तनान्युन्नमय्यवपुराभुयांस्यधः॥द्वीपाद्रीद्दसुरासुरोरगनगेर्नागांपसरम्वा
रणैर्व्यासंवारिविलोलितैःसरसिजैरात्तनमूलैरिव॥एकांभोधिसरःस्थितंत्रिभुवनंकालेननिर्मूलितंकष्टंतेऽगतामहर्द्धिविभवादेवाजगन्नाथकाः
॥७॥बलंबुद्धिश्चतेजश्चक्षयकालउपस्थिते॥विपर्यस्यंतिसर्वत्रसर्वथामहतामपि॥तावन्मायाभवभयकरीपंडितत्वंनयावत्तत्पंडित्यंपत
सिनपुनर्येनसंसारचक्रे॥यत्नंकुर्यादविरतमतःपंडितत्वेमलात्मज्ञानोदारेभयमितरथानेववःशांतिमेति॥सर्वेषामेवधर्माणांकर्मणांशर्मणा
मपि॥पंडितःपुंडरीकाणांमार्त्तंडइवमंडनं॥आत्मज्ञानविदोयांतियांगतिंगतिकोविदाः॥पंडितास्तत्रशक्रश्रीर्जरत्तृणलवायते॥पातालेभूत
लेस्वर्गेसुखमैश्वर्यमेववा॥नतत्पश्यामियन्नामपांडित्यादतिरिच्यते॥पंडितस्ययथाभूतावस्कहृष्टिःप्रसीदति॥हर्षवेदोनिरंभोदसकला २२

मलमंडले॥इदंदृश्यमविद्यात्मब्रह्मसंपद्यतेक्षणात्॥बुधस्यबोधात्स्रग्दामसर्पत्वमिवशाम्यति॥ननश्यतिस्मृतिर्यस्यविमलाबोधशालिनी
॥अयंहेतापिशाचस्तंमनागपिनबाधते॥येषामभ्यासयोगेनसाधुसस्थाछास्त्रसंगमैः॥उदेतिबोधधीर्भूयोयाविस्मरतिनोदयं॥अहोवतदु
रंतेयमभ्याससुदृढीकृता॥अविद्याःविद्यमानेवयाशांतेवनशाम्यति॥वामावामशिरःपादविपर्ययविधौयथा॥पुंसोनविद्यतेशक्तिस्तथा
भाव्यन्यथास्थितौ॥ज्योतिःशास्त्रार्थविज्ञानेरिहभाव्यैर्थवित्तानं॥भवत्यन्यदपूर्वंतुनकिंचनकदाचन॥तरतारुण्यमस्तादंयावत्तावदं
बुधैः॥ननुसंसारनाम्नोस्माद्ध्यानावधिप्रुद्वया॥अद्यैवकुरुयत्नंक्षेयोहृदःसन्किंकरिष्यसि॥स्वगात्राण्यपिभारायभवंतिहविपर्ययेः॥वयो
विपर्ययेहृत्वे॥संसारभिममासाद्यविद्युत्संपातचंचलं॥सच्छास्त्रसाधुसंपर्कैःकर्दमात्सारमुद्धरेत्॥अहोबतनराःक्रूरागतिःकेषांभविष्यति॥
कुर्वंतिकर्दमेमग्नेनात्मन्यपिनिजोयदं॥कर्दमान्मोहकर्दमात्सारमात्मानमुद्धरेदित्यर्थः॥यस्त्वेकवारमात्मैक्यदृष्टिमेवसंत्यजेत्॥इदंसनामशा
स्त्रेभ्योभस्माप्याप्नोतिनाधमः॥इदमुत्तममाख्यानमधेयंवेदवत्सदा॥व्याख्येयंपूजनीयंचपुरुषार्थफलप्रदं॥यदस्मात्प्राप्यतेशास्त्रन्ननहेदा

दवाप्यते॥अस्मिन्नज्ञातेकियाज्ञानंहृयंयातिपवित्रतां॥इदंअध्यात्मशास्त्रंशास्त्रेभ्यःअनध्यात्मशास्त्रेभ्यइत्यर्थः॥अस्माच्छास्त्रवराद्धोधाज्ञा यंतेयेविचारितान्॥लवेनेव्यंजनानीवभांतिशास्त्रांतराणिते॥लवेनेव्यंजनानीवरुचिराणिभांतीतीदंसर्वशास्त्रोपजीव्यमित्यर्थः॥अनार्यः मिदमाख्यानमित्यानार्त्यदृश्यधीः॥माभवंत्वात्महंतारोभवंतोभवभागिनः॥अनार्यकाख्यत्वादपूज्यंदृश्येषुभोगेषु आसक्ताधीर्येषां सुव व्ययश्छांदसः॥ ७॥अस्मदीयाःपूर्वजाःकर्ममीमांसकाःअस्मदीयास्तार्किकाःअस्मदीयाःपूर्वजाःसांख्याःअस्मदीयास्तांत्रिकाअभूवन ॥अतोवयमपितद्दृश्यास्तदनुसृतमार्गमेवाश्रयिष्यामोनाध्यात्मशास्त्रमितिब्रुवाणान्जनानुपहसन्मुग्धस्त्रीणांतन्मार्गप्रवृत्तिंवारयति॥तात स्येति॥तातस्यकूपोयमितिब्रुवाणाःक्षारंजलंकापुरुषाःपिबंति॥यथाभवंतोपिविचारवंतस्तथानिशंभवतात्ततास्ये॥अपूर्वेवघननिद्रा कापिसातत्वदर्शिनां॥यानशाम्यतिकल्पाभ्रवैनाशविकर्त्तनैः॥विनिर्गायेजगत्सर्वंपरमांपूर्णतांगतः॥आत्मसेरमृतंपीत्वाहाशेतसुखमात्म वान्॥आश्वस्तांतःकरणःक्षीणविकल्पःस्वरूपसारमयः॥परमशमामृततृप्तिस्तिष्ठतिविहान्निरावरणः॥तस्मादस्मान्महाशास्त्राद्यथाशक्ति २३

MEMORIAL LIBRARY

विचारयेत्॥भोगोद्योभागमेकंवातेनदुःखस्योभवेत्॥अनर्थेनविचारेणवयःकुर्यान्नभस्मसात्॥बोधेनज्ञानसारेणदृश्यंकर्त्तव्यमात्मसात्॥आ युषःक्षणएकोपिसर्वरत्नैर्नलभ्यते॥नीयतेतद्वृथायेनप्रमादःसुमहानहो॥ ७॥केनापिकारणेनास्मिन्सतीवागीश्वरीतदा॥अवसद्दशवर्षा णिसमस्तर्तुनिषेविता॥तदोतेनहविस्तीर्णमभवद्वनकाननं॥गौरीवनमितिख्यातंभूषितंकुसुमर्तुभिः॥भृंगांगनाजनमनोहरहारिगीतली लाविलोलकलकंठविहंगमंग॥पुष्पांबुवाहशतचंद्रनभोवितानंराजीवरेणुकणकीर्णदिगंतरालं॥पुष्पवर्षिभिरंबुप्रवाहप्रायैस्तरुभि रित्यर्थः॥मंदरकुंदमकरंदसुगंधिताशेसंसृद्धसत्कुसुमराशिशशांकनिष्ठं॥संतानकस्तबकहासविकासकांतमामोदिमारुतसमस्तलताघनौघं ॥पुष्पाकरस्यनगरंनवगीतभृंगंभृंगांगनाकुसुमषंडकमंडपाढ्यं॥चंद्रांशुजालपरिकोमलपुष्पदोलादोलायमानसुरसिद्धवधूसमूहं॥हारी तहंससुककोकिलकोककाकचक्राह्वभासकलविंककुलाकुलांगं॥भारंडकुक्कुटकपिंजलहेमचूडराडामयूरबककल्पितकेलिरम्यं॥हेमचूड स्तित्तिरयःराडाःपक्षिभेदाः॥गंधर्वयक्षसुरसिद्धकिरीटघृष्टपादाब्जकर्णिककदंबसरस्वतीकं॥वातायनंकनककोमलचंपकौघतारांबरांबुधर

पूरग्रहीतगंधं॥मंदानिलस्खलितपल्लवबालवल्लीविन्यासगुप्तदिवसाधिपरश्मिशीतं॥पीतंकदंबकरवीरकनालिकेरतालीतमालकुलपुष्पपरागपूरैः॥
कल्हारकीर्णकुमुदोत्पलपद्मखंडोद्वल्गाच्चकोरबककोककदंबहंसं॥तालीसगुग्गुलकचंदनपारिभद्रभद्रद्रुमोदरविशारिविचित्रशक्ति॥विचित्रास्त्र
र्वाभिलषितपूरणशक्तियस्मिन्॥तस्मिन्वनेचिरमुवासहराद्रिदेहाकेनापिकारणवशेनचिरायगौरी॥भूत्वाप्रसन्नशशिबिंबमुरवीकदंबवागीश्वरीरू
कलेवशिवस्यमूर्ध्नि॥७॥सहस्रेभ्यःसहस्रेभ्यःकश्चिदुत्थायवीर्यवान्॥भिनत्तिवासनाजालंपंजरंकेसरीयथा॥अधिगतपरमार्थस्यक्तरागादिदो
षःसममतिरुदितात्मात्वंमहात्मात्मामहात्मन्॥रघुतनयविशोकस्तिष्ठनिःशंकमेकोजननमरणमुक्तेपावनंतत्पदंस्वं॥अधिकवचनगम्येना
न्यदस्त्यंगकिंचित्तवशुभमुपदेश्यंज्ञानसंबोधनाय॥उदितमखिलमाद्यंज्ञानसारंसमग्रंविदितसकलवेद्योराघवत्वंहिजातः॥इत्युक्तामु
निनाथकोव्यपगताशेषघणेराघवेसर्वस्मिंश्चसभाजनेस्थितवतिध्यानैकतानोपमे॥प्राप्तेब्रह्मपदंधियाधवलयात्तूष्णींमभूत्षड्पदः
क्वेवारणितंसरोजपटलेपातुंप्रवृत्तोरसं॥सिद्धाऊचुः॥आकल्पंसिद्धसंघेषुमोक्षोपायाःसहस्रशः॥व्याख्याताश्चश्रुताश्चात्रमीदृशास्तुन

केचन॥तिर्यंचोवनितावाक्यालाभ्वानेननिर्गतं॥मुनेर्वाक्यविलासेनयांतिनास्त्यत्रसंशयः॥दृष्टैर्हेतुभिर्युक्त्यायथारामोवबोधितः॥त
याचारुदतीसाक्षात्संबोधयतिवानवा॥अनेनमोक्षोपायेनतिर्यंचोपिगतामयाः॥स्थितामुक्ताभविष्यंतिकेनामभुविनोनराः॥श्रवणांजलिभिः
पीत्वाज्ञानामृतमिदंवयं॥परांपुनर्नवीभूतसिद्धयःश्रियमागताः॥श्रीवसिष्ठउवाच॥दिष्ट्याजातोविशोकस्त्वंदिष्ट्यासम्यगवस्थितः॥दिष्ट्या
लोकहयेनर्थशोकतेशममागता॥दिष्ट्यारघूणांतनयसंज्ञःपावितवानसि॥भूतभव्यभविष्यस्थांबोधेनकुलसंततिं॥अधुनामुनिनाथस्यवि
श्वामित्रस्यराघव॥पूरयित्वार्थितांभुंक्ष्वापित्रासहमहीमिमां॥त्वयान्विताःसतनयभृत्यबांधवाःपदातयःसरथगजाश्वमंडलाः॥निरामया
विगतभयाःस्थिरश्रियःसदोदयाःसुभगभवंतुराघव॥एतच्छ्रुत्वावसिष्ठस्यवचःसंसदिपार्थिवाः॥सिक्ताइवामृतापूरैरंतःशीतलतांययुः॥
रामःकमलपत्राक्षोरराजवदेनेंदुना॥स्फुरिदश्वसंपूर्णःसुधापूरेणचारुणा॥वामदेवादयःसर्वेतत्वज्ञानविशारदाः॥अहोभगवताज्ञान
मुक्तमित्यूचुरादिरात्॥शांतांतःकरणोराजामुदादशरथोबभौ॥तुष्टैवसंप्रहृष्टांगोनवांबुनिमुपागतः॥ज्ञातज्ञेयेषुबहुषुसाधुवादक

थास्वथ ॥ उवाचगलितज्ञानोरामोवाक्यमिदंपुनः ॥ भगवन्भूतभव्येशत्वयास्माकमत्रंमत्रं ॥ संप्रमृष्टमिदंहृन्मःश्यामत्वमिववह्निना ॥
अभूमवयमात्मीयकायमात्रदृशःपुरा ॥ प्रभोसंप्रतिसंपन्नाविघ्विश्वावलोकिनः ॥ स्थितोस्मिसर्वसंपूर्णः संपन्नोस्मिनिरामयः ॥
जातोस्मिविगताशंकोबुधाजागर्मिसंप्रति ॥ आनंदितोस्म्यखेदायसुखितोस्मिचिरायच ॥ स्थितोनस्तमयोयेवशाश्वतार्थोदयोमम ॥ अहाबत
पवित्रेणशीतेनज्ञानवारिणा ॥ त्वयासिक्तोस्मितृष्यामिपद्मवद्धृदयेस्वयं ॥ इयमद्यमयालब्धापदवीत्वत्प्रसादतः ॥ यस्यांस्थितस्यमेस
र्वमस्तत्वंगतंजगत् ॥ अतःप्रसन्नमनिरस्तशोकःशोभांगतोहममलाशयएवशोत्या ॥ आनंदमात्मनिगतःस्वयमात्मनैवनैर्मल्यमभ्युपग
तोस्मिनमोस्तुमह्यं ॥ इत्थंविचारपरयोर्मुनिराघवयोस्तयोः ॥ भास्करःश्रवणायव्योममध्यमुपाययौ ॥ तीक्ष्णतामाजगामाशुसर्वादिक्कृतपः ॥
पदार्थोघविकासार्थंरामस्येवमहामतिः ॥ उत्फुल्लहृदयांभोजस्फाराकारतयातदा ॥ लीलापद्माकरारेजुस्तत्रस्थाःपार्थिवाइव ॥ जालंमुक्ताकः
लापानंतरमाक्रांतभास्करं ॥ ननर्त्तैवतरव्योमविज्ञानश्रवणादिव ॥ पुरस्फुरःपद्मरागेषुलग्नार्कतरुणत्विषः ॥ भासोव्योमतलेऽनाधियोज्ञान २५१

कलाइव ॥ एवंनिर्द्दलितमायातेरामस्यकुलकैरवे ॥ मुनीइवदनालोकात्सविकासमिवस्थिते ॥ रवोर्वोर्वीपमेव्योममहाध्येनाभितोगते ॥ तेजःपुंज
त्वसज्ज्वालेसमग्ररसपायिनि ॥ नभोनीलात्पलेनीलेगलद्इजसिराजति ॥ घर्मांशुकणिकाकांतेस्फुरत्किरणकेसरे ॥ अवतंसेजगल्लक्ष्म्यास्मि
लोकीकर्णकुंडले ॥ अतर्ल्लीनस्फुरत्तारारत्नराजिविराजिते ॥ दिग्वधूभिर्वहच्छृंगपाणिभिर्मुकुरेष्विव ॥ धृतेषुतापभिन्नेषुमहाभ्रेषुनिरंबुषु ॥
शृंगशब्देनगिरिशृंगाणिलक्ष्यंते ॥ सूर्यकांतवरोत्थेनवह्निनेवसमेधिते ॥ द्विगुणंप्रज्वलत्यर्कशून्येगगनधामनि ॥ विनेदुर्गेदुरोद्दाममुरव
मारुतपूरिताः ॥ माध्यान्हशंखवाःकल्पांतवातपूर्णाइवार्णवाः ॥ प्रालेयश्रीरिवाब्जेषुघर्मश्रीर्वदनेष्वथ ॥ चकारपदमाकीर्णंशुद्धमुक्ताफलो
पमा ॥ गृहभित्तिपरावृत्तासत्वसंरंभमांसला ॥ शब्दश्रीःपूरयामासकर्णमर्णइवार्णवं ॥ पुरद्रिभिर्निनादोघशांतयेसमुदीरिता ॥ उल्लासन
वापांडुकर्पूरजलदावलिः ॥ सकर्पूरजलसेकलक्ष्मणाजलदावलिः ॥ स गजासत्सामंतःसभूपःसपरिच्छदः ॥ सवसिष्टःसमुत्तस्थोसहरामः
ससंपदः ॥ राजानोराजपुत्राश्चमंत्रिणोमुनयस्तथा ॥ अन्योन्यंपूजिताजग्मुर्मुदिताःस्वंनिवेशनं ॥ अंतःपुरगृहाग्रेषुतालवंतानिलाहतैः ॥ कर्पू

रधूत्तमैरभून्नैवांबुदमालिका॥अथभध्याह्नतूर्याणांरवेस्फूर्जतिभीषणे॥उवाचवचनंवाक्यकोविदोमुनिनायकः॥सर्वमेवश्रुतंश्राव्यंते
यज्ज्ञानमशेषतः॥त्वयाराघवभोनास्तिज्ञानतव्यमपरंवरं॥यथामयोपदिष्टासियथापश्यसिशास्त्रतः॥यथानुभावसिश्रेष्ठमेकवाक्यंतथाकु
रु॥उत्तिष्ठतावत्कार्यायवयंस्नातुंमहामते॥माध्याह्नसमयोस्माकमयमंगातिवर्त्तते॥अपरंयत्त्वयाभद्रस्वाकांक्षाविनिवर्त्तये॥प्रष्टव्यंतद्भुमंत्रा
तःप्रष्टव्यंभवतापुनः॥इत्युक्तोमुनिनाथेनराजादशरथःस्वयं॥पूजयामासतान्सम्यान्सर्वान्साधून्सपर्यया॥सहरामेणधर्मात्मामुनिश्रेष्ठा
न्नृपांश्चसः॥वसिष्ठायुपदिष्टेनक्रमेणव्योमगास्तथा॥ ७॥इत्युक्तवत्यथमुनौनभसोननादवर्षामृताभ्रमिवदुंदुभिरामरेद्राक्॥पुष्पौ
घतारिवलकुड्मलनातुषारवर्षोपमाभुविपपातचतुष्पदृष्टिः॥किंजल्कजालदवसीतघनांगरागावातावधूतसितकेसरगौरहारा॥पुष्पोदरो
त्थमृदुशीकरशीतलांगाप्राप्तास्वर्गसुरपुरादिवपुण्यलक्ष्मीः॥कल्पांतकालकपिकंपितशुष्कशारवास्वर्गद्रुमास्खलितमाशुविउद्बभूवुः॥तारा
गणंग्रथितभासमनल्पहासमाशामुखप्रस्तभैरवमंबरस्था॥सापुष्पवृष्टिरथदुंदुभिनादगर्ज्जालिंजल्कपुंजजलदाश्रममाजगाम॥आपूरि २६

नारिवरसभाहिमहारिपुष्पपूरेणकौतुकविकासकरीक्षणेन॥तानिदिव्यानिपुष्पाणियथास्थानमधःस्थिताः॥वसिष्ठायनमस्कृत्यसभ्याः
संशोकिनोजडुः॥श्रीदशरथउवाच॥अहोनुसुविशालानःसंसारवितताकृतेः॥विश्रांताःस्मश्चिरंश्रांताःशुष्कामेघाइवाचले॥संसारकृ
क्षणाद्वितताकृतेरतिदीर्घाकोतारादित्यर्थः॥कर्मणामवधिःपूर्णोदृष्टःसीमांतआपदां॥ज्ञातंज्ञेयमशेषेणविश्रांताःस्मःपरेपदे॥श्रीरामउ
वाच॥नष्टोमोहःपदंप्राप्तंत्वत्प्रसादान्मुनीश्वर॥संपन्नोयमहंसत्यमत्यंतमवदातधीः॥स्थितोस्मिगतसंदेहःस्वभावेब्रह्मरूपिणि॥निरावृ
रणविज्ञानःकरिष्यवचनंतव॥स्मरत्वास्मत्तामतासेकसौख्यदंवचनंतव॥अर्हतोपिचशांतोपिहृष्यामीवमुनेमुहुः॥नैवमेद्यकृतेनार्थो
नाकृतेनहकश्चन॥यथास्थितोस्मितिष्ठामितथैवविगतज्वरः॥कथमेतांजनोवेत्तिविनाभवदनुग्रहं॥विनैवसेतुंपोतंवाबालोब्धिंलंघयेत्कथं
॥एतांदृष्टिं॥जन्मांतरोपचितसंशयनाशनेनजन्मांतरोपचितपुण्यशतोदयेन॥जातोद्यमेमुनिवचःपरिबोधनेनजातोद्यमेमनसिचंद्रइवप्रकाशः॥
ईदृश्यांदृश्यमानायांदशिरोपदशांशतेः॥काष्ठवद्दृश्यतेलोकःस्वदुर्भागतयातया॥अहोबतमहत्पुण्यंश्रुतंज्ञानंमुनेर्मुखात्॥येनगंगासंह

स्त्रेणस्नातास्त्रवयंस्थिताः॥संपदामास्पदंदृष्टीनांशास्त्राणामापदांगिरां॥देशानामप्यदृष्टानांदृष्टःसीमांतुउत्तमः॥यन्नश्रुतंब्रह्मलोकेस्वर्गेभूमित
लेतथा॥कर्णेनीतंनज्ञानकेमौर्ख्ययातौमेघपवित्रतां॥हार्दंबास्थंचतिमिरमपमृष्टवतात्वया॥मुनेपरमभानुतेनूनंनःसंप्रदर्शितं॥निर्हतोस्मिप्रशां
तोस्मिप्राप्तोस्मिपरमंपदं॥चिरायपरिपूर्णोस्मिसुखमासेचकेवलं॥बहुजन्मोपलब्धेनपुण्येनायंमुनीश्वरः॥धीरःकथितवान्नस्त्वेनपावनतां
गताः॥इतितेषुवदत्स्वत्रसभ्येषुसहभूभृता॥वसिष्ठःसउवाचेदंज्ञानपावनयागिरा॥राजन्रघुकुलैकेंद्रोयदहंवच्मितत्कुरु॥इतिहासकथां
तेहिपूजनीयाहिजानयः॥तदयत्नात्स्वणेोघास्त्वंसर्वकामैःप्रपूरय॥वेदार्थसमनुष्ठानफलंप्राप्स्यसिशाश्वतं॥७॥अथैकःसर्गःक्रमेणोच्यते॥श्रीवाल्मीकिरुवाच॥भरद्वाजमहाबुद्धेममशिष्याधिनायक॥इतिरामादयोज्ञातत्वेयानिःशोकतांगताः॥१॥एतामेवदशांकांतामवष्टभ्यथासु
रवे॥नारागास्तिष्ठनिःशंकोजीवन्मुक्तःप्रशांतधीः॥२॥धीरनभ्यस्तसंगाहिरामादीनामिवानघ॥घनमोहनिमग्नापिविमूढापिनमुह्यति॥३॥एवमेतेमहा
त्मानोजीवन्मुक्तपदंगताः॥राजपुत्राराघवाद्याराजादशरथादयः॥४॥त्वंचपुत्रभरद्वाजस्वयमेवासिमुक्तधीः॥सत्यमुक्ततरोस्यद्यश्रुत्वेमांमोक्षसंहि

तां॥५॥मोक्षोपायानिमान्पुण्यान्प्रत्यक्षानुभवार्थदान्॥बालोप्याकर्ण्यतदृज्ञत्वंयातिकाकाहशेकथा॥६॥यथापदंपुण्यमनुप्रयाताःमहानुभावारघवो
विशोकाः॥वसिष्ठवाक्यप्रसरेणसाधोगंतव्यमाद्यंपदमेवमेव॥७॥सतांनयेनोत्तमसेवयाचप्रश्नेनचोदारकथागतेन॥विंदंतिवेद्यंसुधियोप्रमत्तावः
सिद्धसंगादिवराघवाद्याः॥८॥तृष्णावरत्राहृदबंधबद्धायेग्रंथयोज्ञस्यहृदिप्ररूढाः॥सर्वेहितेमोक्षकथाविचाराद्वाल्मीकबालाइवयांत्यभेदं॥९॥
मोक्षाभ्युपायान्सुमहानुभावान्हास्यंतियेतत्त्वविदांवरिष्ठाः॥पुनःसमेष्यंतिनसंसृतिंतेकोर्थःसुतान्येनबृहद्वतेन॥१०॥हेसुतपुत्रवदनुकंप्यभरद्वा
ज॥बहुश्रुताग्रेप्रविचार्यसम्यक्प्रबोधितार्थेकथयाजनाय॥संतोवदिष्यंतिपुनःशिशुत्वंनतेप्रयास्यंतिकिमन्यवाक्यैः॥११॥अमुंग्रंथंयेसं
तःबहुश्रुतानांगुरुणामग्रेस्वयंसम्यक्प्रविचार्यतत्संवादकथयाग्रंथेसम्यक्प्रबोधितार्थसंतिपुनःपश्चात्स्वयमपिशुश्रूषवेजनायसंप्रदायतोव
दिष्यंतितेशिशुत्वंमौर्ख्यंपुनर्जन्मवानप्रयास्यंतिअवश्यंतत्त्वज्ञानफलंप्राप्स्यंतीत्यर्थः॥अन्येःसंप्रदायतोनाधिगंतेर्वाक्यैःश्रुतेःश्राविंतेर्वाकिंप्र
योजनमित्यर्थः॥येवाचयिष्यंत्यनपेक्षितार्थायेलेखयिष्यंतिचपुस्तकंवा॥येकारयिष्यंत्यपिवाचकंवाव्याख्यातृयुक्तंशुभमार्यदेशे॥१२॥तेराज

सत्यस्यपलेनयुक्तामुहुर्मुहुःस्वर्गमुदारसत्त्वाः॥मोक्षंप्रयास्यंतितृतीयजन्मतत्राभिनलक्ष्मीमिवपुण्यवंतः॥१३॥इमांपुरामोक्षमयींविचार्यसुसंहितां
सद्वचनाद्विरिंचेः॥प्रयुक्तवानेतदचिंत्यरूपोभवंत्यसत्याश्चननस्यवाचः॥१४॥मोक्षाम्युपायाख्यकथाप्रबंधेयातेसमाप्तिंसुधियाप्रयत्नात्॥सुवे
श्मदत्वाभिमतान्नपानदानेनविप्राःपरिपूजनीयाः॥१५॥देयंचतेभ्यःस्वतुदक्षिणादिचेत्तेषितंस्वस्यधनस्यशक्त्या॥मत्वानुरूपंकृतमेवसंगः
पुण्यंयथाशास्त्रमुपेत्यसोतत्॥१६॥एतेनकथितंकथाक्रमशतेर्बोधायबुद्वद्वच्छास्त्रंसंहितब्रह्मतत्वममलंदृष्टांतयुक्त्यंचितं॥श्रुत्वेतिचिरनिर्व
तिंभजभृशंजीवन्विमुक्ताशयोलक्ष्मीज्ञाननपःक्रियाफलयुतांमुक्ताख्यामश्नुते॥१७॥इत्यार्षेश्रीवाल्मीकीयेमहारामायणेमोक्षोपायेद्वात्रिंश
त्सहस्रसंहितायांनिर्वाणप्रकरणेउत्तरार्द्धेपंचदशोत्तरद्विशततमःसर्गः॥२१५॥ ७॥अस्मिन्महारामायणेवैराग्यप्रकरणंमुमुक्षुप्रकरणंउत्पत्तिप्रकरणं
स्थितिप्रकरणंउपशमप्रकरणंनिर्वाणप्रकरणमितिषट्प्रकरणानिसंति॥ ७॥सतिकाकुत्स्थकुलोन्नतिकारिणिरामायणेकिमन्यत्काव्येन॥सह
तिकुल्यागंगापूरेकिंबहुरसेवहति॥श्रीरामायणभारतबृहत्कथानांकवीन्नमस्कुर्मः॥त्रिःस्नाताश्वसरसासरस्वतीस्फुरतियैर्भिन्ना॥इमेआ २८

यैर्गाढईनस्य॥ ७॥मत्स्यंउद्यानहिताद्दशामधुरिमानेवानुरागंधीकांतांबंधुरदंतवाससिनवेरवंउनवारवंउवे॥पीयूक्षासुनचांतरिक्षुमधुबहुना
किंनापिपीयूषकेश्रीवाल्मिकिसरस्वतीपुसरसास्वत्यद्भुतोयादृशः॥इदंपद्यंलेकस्य।पीयूक्षाद्राक्षेतिहेमचंद्रः॥सितामध्वादिमधुरोद्राक्षादाडिमजो
रसः॥विरलश्चेक्षुतोरागःसांद्रश्चेत्खंउवःस्मृतइतिसंसारावर्त्तः॥ ७॥भास्वद्दंशावतंसकीर्तिरमणीरंगप्रसंगस्वनद्वाद्यप्रथमध्वनिर्विजयतेवः
ल्मीकजन्मामुनिः॥पीत्वायद्वचनेंदुमंडलगलत्काव्यामृताख्येःकिमप्याकल्पंकविनूतनांबुदमयीकादंबिनीवर्षति॥इदंपद्यंजयदेवस्य॥ ७॥श्रीवाल्मी
किर्वसिष्ठस्यविश्वामित्रादिभ्योनमोनमः॥ ७॥श्रीसीतारामचंद्रःप्रसीदतु॥ ७॥अथवैराग्यप्रकरणस्थानिकानिचिसद्यानिलिख्यंते॥कार्यमण्वपिकालेतुरू
तमेरूपकारतां॥महदप्युपकारोपिरिक्तोमेत्यकालतः॥अपिबालांगनासंगादपिसाधोसुधारसात्॥राज्यादपिसुखंयेवपुत्रस्नेहोमहामते॥येदुस्तामरा
रंभास्त्रिषुलोकेषुखेदराः॥पुत्रस्नेहेनसंतोपिकुर्वतेतानसंशयं॥येतपःक्लेशास्तान्॥असवोयधनंदारास्त्यजंतेमानवैःसुखं॥नपुत्रोमुनिशार्दूलस्वभावोत्रेष
जंतुषु॥मोहयंतिमनोह्येतंखंउयंतिगुणावलिं॥दुःखजालंप्रयच्छंतिविप्रलंभपराश्रियः॥खलाःकालेकालेनिशानिशितमोमोहमहिकागतालोकेलोकेविष

यशनचोराःसुचतुराः॥प्रहस्ताःप्रोद्युक्तादिशादिशिविवेकेकहरणेरणेशक्तास्तेषांकरंविदुषःप्रोज्झ्यसुभटाः॥अथक्रमेणसर्गाःकेचिल्लिख्यंते॥श्रीरामउवाच॥इयमस्मिन्स्थितोदारासंसारेपरिकल्पिता॥श्रीर्मुनेपरिमोहायसर्पिनूनंकदर्थदा॥१॥उल्लासबद्धुलानंतकल्लोलानलमाकुलान्॥जडान्प्रवहतिस्रोतरान्प्रावषीवनरंगिणी॥२॥चिंतादुहितरोबद्ध्वाभूरिदुर्ललितेधिया॥चंचलाःप्रभवंत्यस्यास्तरंगाःसरितोयथा॥३॥एषाहिपदमेकत्रनिबध्नातिदुर्भगा॥दग्धेवनियताचारमित्तम्श्वेतम्श्वधावति॥४॥जनयंतीपरंदाहंपरामृष्टांगिकासती॥विनाशमेवधत्तेतदंशपलेरेवकज्जलं॥५॥गुणागुणविचारेण विनेवकिलपार्श्वगं॥राजप्रकृतिवन्मूढादुराराध्यापरिक्षीनया॥पश्याम्यभव्ययात्रस्म्याकिंचिद्दुःखाद्दतेसुखं॥६॥कर्मणातेननेनेषाविस्तारमनुगछति॥दोषाशीविषवेगस्यथस्त्रीरंविस्तरायते॥७॥तावच्छीतमृदुस्पर्शःपरेस्वेचजनेजनः॥वात्ययेवहिमंयावच्छ्रियानपरुषीकृतः॥८॥प्राज्ञाःशूराःकृतज्ञाश्चपेशलामदवश्चये॥पुंसुमुस्येवमय्या णःश्रियातेमलिनीकृताः॥९॥नश्रीःसुखायभगवन्दुःखायैवहिवर्द्धते॥गुप्तविनाशनंधत्तेमृतिंविषलतायथा॥१०॥श्रीनजननिंयश्चशूरम्श्वापिवि कत्थनः॥समदृष्टिःप्रभुश्चैवदुर्लभाःपुरुषारत्नयः॥११॥एषाहिविषमादुःखभोगिनांगहनागुहा॥घनमोहगजेंद्राणांविंध्यशैलमहातटी॥१२॥सत्कार्यप

BHAU DAJI

रजनीदुःखैकरत्रंद्रिका॥सुदृष्टिदीपिकावात्याकल्लोलोद्यतरंगिणी॥१३॥संभ्रमाभ्रादिपदवीविषादविषवर्द्धनी॥केदारिकाविकल्पानांरवेदाय भयभोगिनी॥१४॥हिमंवैराग्यवल्लीनांकिंकारोरुकथाभिनी॥राहुदंष्ट्राविवेकेंदोःसोजन्यांभोजचंद्रिका॥१५॥इंद्रायुधवदारोलनानारागमनोहरा॥लोलान्तर्द्रिदोत्पन्नध्वंसिनीचजडाश्रया॥१६॥चापल्लावजितारण्यनकुलीनकुलीनजा॥विप्रलंभनतास्पर्यजिनोग्नमृगतृष्णिका॥१७॥ लहरीवैकरूपेणपदंक्षणमकुर्वती॥चलादीपशिखेवातिदुर्ज्ञेयगतिगोचरा॥१८॥सिंहीवविग्रहव्यग्रकरींद्रकुलपालिनी॥खड्गधारेवशिशिरातीक्ष्णतीक्ष्णशयाश्रया॥१९॥नानयापत्तताधिन्यादुराधिपरिलीनया॥पश्याम्यभव्ययात्रस्म्याकिंचिद्दुःखादृतेसुखं॥२०॥दूरेणोत्सारितालक्ष्म्यापुनरेवतमादरात्॥अहोबतास्लिष्यतीवनिर्लज्जादुर्जनासदा॥२१॥मनोरमाकर्षतिचित्तहस्तिंकदर्थसाध्याक्षणभंगुराच॥व्यालाधःलीगात्रविवृत्तदेहाश्चभ्रोत्थितापुष्पलतेवलक्ष्मीः॥२२॥इत्यार्षेश्रीवाल्मीकीयमहारामायणेयोगवासिष्ठेवैराग्यप्रकरणेलक्ष्मीनिराकरणंनामत्रयोदशःसर्गः॥ १३॥ श्रीरामउवाच॥आयुःपल्लवकोणाग्रलंबांबुकणभंगुरं॥उन्मत्तमिवसंत्यज्यायात्यकांडेशरीरकं॥१॥

विषयाशीविषासंगपरिजर्जरचेतसां॥ अप्रौढात्मविवेकानामायुरायासकारणं॥२॥ येतुविज्ञातविज्ञेयाविश्रांतावितनेपदे॥ भावाभावसमाश्वा
समायुस्तेषांसुरवायते॥३॥ वयंपरिमिताकारपरिनिष्ठितनिश्चयाः॥ संसाराभ्रतडित्पुंजेमुनेनायुषिनिर्हृताः॥४॥ युज्यतेवेष्टनंवायोराकाशस्य
चरवंडनं॥ ग्रंथनंचतरंगाणामास्थानायुषियुज्यते॥५॥ पेलवंशारदीवाभ्रमस्नेहश्चदीपकः॥ तरंगकइवालोलंगतमेघोपलक्ष्यते॥६॥ तरंगप्रतिबिंबेव
दंतडित्पुंजनभोबुजे॥ ग्रहीतुमास्थांबभ्रमिनत्वायुषिहतस्थितौ॥७॥ अविश्रांतमनाःशून्यमायुरातततमीहते॥ दुःखायैवविमूढांतर्गर्भमश्वतरी
यथा॥८॥ संसारसंसरत्नावस्यांफेनोस्मिन्सर्गसागरे॥ कायवल्यंभसोबुद्बुदजीवितंमेनरोच्यते॥९॥ प्राप्यंसप्राप्यतेयेनभूयोयेननशोच्यते॥ परा
यानिर्वृतेःस्थानंयत्तज्जीवितमुच्यते॥१०॥ तरवोपिहिजीवंतिजीवंतिमृगपक्षिणः॥ सजीवतिमनोयस्यमननेननजीवति॥११॥ जातास्तएवजगतिजं
तवःसाधुजीविताः॥ येपुनर्नेहजायंतेशेषाजरठगर्दभाः॥१२॥ भारोविवेकिनःशास्त्रंभारोज्ञानंचरागिणः॥ अशांतस्यमनोभारोभारोनात्मविदोव
पुः॥१३॥ रूपमायुर्मनोबुद्धिरहंकारस्तथेहितं॥ भारोभारधरस्येवसर्वदुःखायदुर्धियः॥१४॥ अविश्रांतमनापूर्णमापदांपरमास्पदं॥ नीडंरोगाधि ३९

हंगानामायुरायासनंदृढं॥१५॥ प्रत्यहंक्षेदमुत्सृज्यशनैरल्पमनारतं॥ आरुजेवजरद्भंगकालेनविनिहन्यते॥१६॥ शरीरबिलविश्रांतैर्विषदाशहप्रदा
यिभिः॥ रोगैरापीयतेरौद्रैर्व्यालैरिववनानिलः॥१७॥ प्रसुप्तानेरविच्छेदंतुच्छैरंतरवासिभिः॥ दुःखैराघ्रप्यतेक्रूरैर्घुणैरिवजरद्रुमः॥१८॥ मूर्खनिग
रणायाघनगर्हमनारतं॥ आखुर्मार्जारकेणेवमरणेनावलोक्यते॥१९॥ गंधादिगुणगर्भिण्याशून्ययाशक्तिवेश्यया॥ अन्नंमहाशनेनेव
जरयापरिजीर्यते॥२०॥ दिनैःकतिपयैरेवपरिक्षायगतादरं॥ दुर्जनःसुजनेनेवयौवनेनावमुच्यते॥२१॥ विनाशसुहृदानित्यंजरामरणबंधुना॥
रूपंरिंगवरेणेवरूतांतेनाभिरक्ष्यते॥२२॥ स्थिरतयासुखभासितयातयासततमुज्झितमुत्तमफल्गुच॥ जगतिनास्तितयागुणवर्जितंमरण
भाजनमायुरिदंयथा॥२३॥ ॥इत्यार्षेश्रीवाल्मीकीयेमहारामायणेयोगवासिष्ठेवैराग्यप्रकरणेजीवितगर्हानामचतुर्दशःसर्गः॥१४॥
श्रीरामउवाच॥ मधुवाभ्युथितोमोहान्मुधैवपरिवर्धते॥ मिथ्यामयेनभीतोस्मिदुरहंकारशत्रुणा॥१॥ अहंकारवशादेवदोषकोशकदर्थनां॥ दद
तिदीनदीनानांसंसारोविविधाकृतिः॥२॥ अहंकारवशादापदहंकाराद्दुराधयः॥ अहंकारवशादीहात्वहंकारोममामयः॥३॥ तमहंकारमाश्रि

त्यपरमंचिरवैरिणं॥नभुजेनपिबाम्यंभः किमुभोगान्भुजेमुने॥४॥संसाररजनीदीर्घामायामनसिमोहिनी॥तनाहंकारदोषेणकिरातेनेववा
गुरा॥५॥यानिदुःखानिदीर्घाणिविषमाणिमहांतिच॥अहंकारात्प्रसूतानितान्यगात्रवदिराइव॥६॥शमेंदुसैंहिकेयास्यंगुणपद्महिमाशि
निं॥साम्यमेघशरत्कालमहंकारंत्यजाम्यहं॥७॥नाहंरामोनमेवाछाभावेषुनचमेमनः॥शांतआसितुमिछामिस्वात्मनीवजिनोयथा॥८
॥अहंकारवशाद्यद्यन्मयाभुक्तंहुतंकृतं॥सर्वतत्तदवस्त्वववस्त्वहंकारिरिक्तता॥९॥अहमित्यस्तिचेद्दुःखंनहमापदिदुःखिवत्॥नास्तिचेत्सुखिव
तस्तस्मादनहंकारितावरं॥१०॥अहंकारंपरित्यज्यमुनेशांतमनस्तथा॥अवतिष्ठगतोद्वेगःभौगैर्भंगुरास्पदः॥११॥व्रजन्यावदहंकारवारिदः
परिजृंभते॥तावद्विकाशमायातितृष्णाकुटजमंजरी॥१२॥अहंकारघनेशांततृष्णानवतडिल्लता॥शांतदीपशिखावत्स्याद्यापियात्यतिसत्वरं॥१३॥
अहंकारमहावेंध्येमनोमत्तमहागजः॥विस्फूर्जतिघनास्फोटैस्तानितैरिववारिदः॥१४॥हृद्देहमहारण्यघनाहंकारकेसरी॥योयमुल्लसतिस्फा
रस्तेनेदंजगदाततं॥१५॥तृष्णातंतुलतप्रोतावकुजन्मपरंपरा॥अहंकारोग्निरिवेगनकंठेमुक्तावलीकृता॥१६॥पुत्रामित्रकलत्रादितंत्रमंत्रविव ३१

र्जितं॥प्रसारितमनेनेहमुनेहंकारवैरिणा॥१७॥प्रमार्जितेहमित्यस्मिन्पदेस्वयमपिद्रुतं॥प्रमार्जिताभवंत्येतसर्वएवदुराधयः॥१८॥अहमित्यंबु
देशांतेशनैश्चशमशालिनी॥मनोगगनसंमोहभीहिकाकापिगच्छति॥१९॥निरहंकारवृतेर्मोरव्याच्छोकेनसीदतः॥यत्किंचिदुचितंब्रह्मंस्तदाख्या
तुमिहार्हसि॥२०॥सर्वापदांनिलयमध्रुवमंतरस्थमुन्मुक्तमुत्तमगुणेननसंश्रयामि॥यत्प्रादहंहृतिपदंपरितोनिदुःखंशेषेणमासमनुशाधिमहा
नुभाव॥२१॥इत्यार्षेश्रीवाल्मीकीयेमहारामायणेयोगवासिष्ठेवैराग्यप्रकरणेअहंकारजुगुप्सानामपंचदशःसर्गः॥ ॥१५॥ ॥श्रीरामउवाच
॥दोषार्जर्जरतांयातिसत्कार्यादार्यसेवनात्॥वातांतःपिच्छलवद्वेतश्चलतिचंचलं॥१॥इतश्चेतश्चसुव्यग्रंव्यर्थमेवाभिधावति॥दूराद्दूरतरंदी
नंम्गमेकौलेयकोयथा॥२॥नप्राप्नोतिक्वचित्किंचित्प्रासैरपिमहाधनैः॥नांतःसंपूर्णतामेतिकरंडकइवांबुभिः॥३॥नित्यमेवमुनेशून्येकदा
शावागुरावत॥नमनोनिर्वृतिंयातिमृगोयूथादिवच्युतः॥४॥नरंगतरलांवृत्तिंरंधदारूनशीर्णतां॥परित्यज्यक्षणंमपिहृदयेयातिनास्थितं
॥५॥मनोमननिर्वृद्धव्यंदिशोदशविधावति॥मंदराहननोद्भूतंक्षीरार्णवपयोयथा॥६॥कल्लोलकलितावर्तंमायामकरमालितं॥ननिराद्रु

समर्थोस्मिमनोमयमहार्णवं ॥७॥ भोगदूर्वाकुराकांक्षीभ्रमपातमचिंतयन् ॥ मनोहरिणकोब्रह्मन्दूरंविपरिधावति ॥८॥ नकदाचनमे
चेतःस्वामात्मन्विशीर्णतां ॥ त्यजत्याकुलयावृत्त्याचंचलत्वमिवार्णवः ॥९॥ चेतश्चंचलयावृत्त्याचिंतानिचयचंचुरं ॥ धृतिंबभ्रातिनैकत्रपंज
रेकेसरीयथा ॥१०॥ मनोमोहरथारूढंशरीरात्समतासुरं ॥ हरत्यपहृतोद्वेगंहंसःक्षीरमिवांभसः ॥११॥ अनल्पकल्पनातल्पेविलीनाश्चि
न्तयः ॥ मुनींद्रनप्रबुध्यंतेतेनतेप्यहमाकुलैः ॥१२॥ क्रोडीकृतदृढग्रंथितृष्णासूत्रस्थितात्मना ॥ विहगोजालकेनेवब्रह्मन्बद्धोस्मिचे
तसा ॥१३॥ संततामर्षधूमेनचिंताज्वालाकुलेनच ॥ वह्निनेवतृणंशुष्कंमुनेदग्धोस्मिचेतसा ॥१४॥ क्रूरेणजडतांयातःतृष्णाभार्यानुगा
मिना ॥ शवंकौलेयकेनेवब्रह्मन्भुक्तोस्मिचेतसा ॥१५॥ तरंगतरलास्फालवृत्तिनाजडरूपिणा ॥ तटवृक्षइवौघेनब्रह्मन्नीतोस्मिचेतसा ॥१६॥
अवांतरनिपातायशून्येवाभ्रमणायच ॥ तृणंचेष्टाभिनेत्रेनेवदूरंनीतोस्मिचेतसा ॥१७॥ संसारजलधेरस्मान्नित्यमुत्तरणोन्मुखः ॥ सेतुनेवप
यःपूरोराधितोस्मिकुचेतसा ॥१८॥ पातालाकूपतोपध्वींपथ्याःपातालगामिना ॥ कूपकांडकुदाम्नेववेष्टितोस्मिकुचेतसा ॥१९॥ मिथ्येवस्फारक ३२

पेणविचारादृशारुणा ॥ बालोवेतालकेनेवगृहीतोस्मिकुचेतसा ॥२०॥ वज्रेरुष्णतरःशैलादपिकष्टतरःक्रमः ॥ वज्रादपिदृढोब्रह्मन्दुर्निग्रहमनो
यदः ॥२१॥ चेतःपततिकार्येषुविहगःस्वामिषेष्विव ॥ क्षणेनविरतिंयातिबालःक्रीडनकादिव ॥२२॥ जडप्रकृतिरालोलोवितताववर्तहेतिमान् ॥
मनोब्धिरहितव्यालोदूरंनयतितातमां ॥२३॥ अप्यब्धियानान्महतःसुमेरून्मूलनादपि ॥ अपिवन्ह्यशनात्साधोविषमाश्चित्तनिग्रहः ॥२४॥ चित्तं
कारणमर्थानांतस्मिन्सतिजगत्त्रयं ॥ तस्मिन्नाक्षीणेजगत्क्षीणंतच्चिकित्स्यंप्रयत्नतः ॥२५॥ चित्तादिमानिसुखदुःखवशतानिनूनमभ्यागतान्य
गवरादिवकाननानि ॥ तस्मिन्विवेकवशतस्तनुतांप्रयातेमन्येमुनेनिपुणमेवगलंतितानि ॥२६॥ सकलगुणजयाशायत्रब्रह्मन्महद्भिस्तमरिमिह
विजेतुंचित्तमभ्युत्थितोहं ॥ विगततरितयांतर्नाभिनंदामिलक्ष्मीजडमलिनविलासांमेघलेखामिवेंदुः ॥२७॥ ॥इत्यार्षेमहारामायणेश्रीवाल्मी
कीयेयोगवासिष्ठेवैराग्यप्रकरणेचित्तदौरात्म्यनामषोडशःसर्गः ॥ ॥१६॥ ॥श्रीरामउवाच ॥ हार्दोपकारशर्वर्यांतृष्णयेहदुरंतया ॥ स्फुरंतिचे
तनाकोशदोषाःकौशिकपंक्तयः ॥१॥ अंतर्दाहप्रदायिन्यासमूढरसमार्दवः ॥ पंकआदित्यदीप्त्यवशोषंनीतोस्मिचिंतया ॥२॥ ममचित्तमहारण्ये

व्यामोहतिमिराकुले॥शून्येतांडविनीजातामृशमाशापिशाचिका॥३॥वचोरचितनीहाराकांचनोपवनोज्वला॥नूनंविकासमायातिचिंताचणकमंजरी॥४॥अलमंतर्ममायेवतृष्णातरलिताशया॥आयातविषमोल्लासमूर्मिरंबुनिधाविव॥५॥उद्दामकल्लोलरवोदहार्णवहनीहमे॥तरंगतरलाकारातरतृष्णातरंगिणी॥६॥वेगंसंरोढुमुदितोवात्ययेवजरत्तृणं॥नीतःकलुषयाकापितृष्णयाचित्तचातकः॥७॥योयामहमतीवास्थांसंश्रयाभिगुणश्रियं॥तांतांक्लेततिमेतृष्णातंत्रीमिवकुमूषिका॥८॥पथसीवजरत्यर्णेवायाविवजरंतृणं॥नभसीवशरन्मेघाश्चिंताचक्रेभ्रमाम्यहं॥९॥गंतुमास्पदमात्मीयमसमर्थधियोवयं॥चिंताजालेविमुह्यामोजालेशकुनयोयथा॥१०॥तृष्णाभिधानयातातदग्धोस्मिजालयातया॥यथादाहोपशमनमाशंकेनाम्नैतेरपि॥११॥दूरंदूरमितोगत्वासमेत्यचपुनःपुनः॥भ्रमत्यासुदिगंतेषुतृष्णान्मत्तातुरंगमी॥१२॥जडसंसर्गिणोतृष्णारूतोर्ध्वीयोगमार्गमा॥रुध्यग्रंथिमतीनित्यमारघट्टाग्ररज्जुवत्॥१३॥अतर्ग्रथितयादेहसर्वदुश्छेदयान्यया॥रज्ज्वेवासुबलीवर्दस्तृष्णयावाह्यतेजनः॥१४॥पुत्रमित्रकलत्रादितृष्णयानित्यकृष्टया॥स्वगेष्विवाकरात्येदंजालंलोकेषुरच्यते॥१५॥भीषयत्यपिधीरंमामधयत्यपिसेक्षणं॥खेदयत्यपिसानंदंतृष्णारूष्णेवशा ३३

वैरी॥१६॥कुटिलाकोमलस्पर्शाविषवेषम्यशंसिनी॥दशत्यपिमनाकुस्पृष्टातृष्णाकृष्णेवभोगिनी॥१७॥भिंदतीहृदयंपुंसांमायामथविधायिनी॥दौर्भाग्यदायिनीदीनातृष्णाकृष्णेवराक्षसी॥१८॥तंत्रीतंत्रीगुणैःकोशंदग्धानापरिवेष्टितं॥नानंदेराजतेब्रह्मन्तृष्णाजर्जरवल्लकी॥१९॥नित्यमेवातिमलिनाकटुकोन्मादकारिणी॥दीर्घतंत्रीघनस्नेहातृष्णागह्वरवल्लरी॥२०॥अनानंदकरीशून्यानिष्फलाव्यर्थमुन्नता॥अमंगलकरीक्रूरातृष्णाक्षीणवमंजरी॥२१॥अनावर्जितचित्तापिसर्वमेवानुधावति॥नचाप्नोतिफलंकिंचित्तृष्णाजीर्णेवकामिनी॥२२॥संसारहृदेमहतिनानारससमाकुले॥भुवनाभोगरंगेषुतृष्णाजठरनर्तकी॥२३॥जराकुसुमितारूढापातोत्पातफलावलिः॥संसारजंगलेदीर्घतृष्णाविषलतातता॥२४॥यन्नशक्नोतितत्रापिधत्तेताउचितांगतिं॥नृत्यत्यानंदरहितंतृष्णाजीर्णेवनर्तकी॥२५॥भ्रशंस्फुरतिनीहारेशाम्यत्यालोकआगते॥दुर्लभेष्वपदंधत्तेचिंताचपलबर्हिणी॥२६॥जडकल्लोलबहुलाचिरंशून्यांतरांतरा॥क्षणमुल्लासमायातितृष्णाप्रावृडतरंगिणी॥२७॥नष्टमुत्सृज्यनिष्टंतंतृष्णावत्स्मिवापरं॥पुरुषान्पुरुषंयातितृष्णालोलेवपक्षिणी॥२८॥पदंकरोत्यलंध्येपितत्सापिफलमीहते॥चिरंतिष्ठतिनैकत्रतृष्णाचपलमर्कटी॥२९॥इदंकृत्वेदमायातिसर्वमेवा

समंजसं॥ अनातरंचयततेतृष्णाचेष्टवदेविकी॥३०॥क्षणमायातिपातालंक्षणंयातिनभस्तलं॥क्षणंभ्रमतिदिक्कुंजेतृष्णात्यक्तेपरपदी॥३१॥सर्व सिद्ध
संसारदोषाणांतृष्णैकादीर्घदुःखदा॥अंतःपुरस्थमपियायोजयत्यतिसंकटे॥३२॥प्रयच्छतिपरंजाड्यंपरमालोकरोधिनी॥मोहनातारगहनातृष्णा
जलदमालिका॥३३॥सर्वेषूर्वीजंतुजातानांसंसारव्यवहारिणां॥परिप्रोतमनोमालातृष्णाबंधनरज्जुवत्॥३४॥विचित्रवर्णाविगुणादीर्घमालिन
संस्थितिः॥शून्याशून्यपदातृष्णाशक्रकार्मुकधर्मिणी॥३५॥अशनिर्गुणसस्यानांफलिताशरदापदां॥हिमंसंवित्सरोजानांतमसादीर्घयामिनी॥
३६॥संसारनाटकनटीकार्यालयविहंगमी॥मनसारण्यहरिणीस्मरसंगीतवल्लकी॥३७॥व्यवहाराब्धिलहरीमोहमातंगशैवल्ग॥सर्वव्ययोप
सुलनादुःखैकेरवचंद्रिका॥३८॥जरामरणदुःखानामेकरत्नसमुद्भिका॥आधिव्याधिविलासानांनित्यमत्तविलासिनी॥३९॥क्षणमालोकंकिम
लासोधकारत्वमाक्षणं॥व्योमवीथ्युपमातृष्णानीहारगहनाक्षणं॥४०॥गच्छत्कपशमंतृष्णाकायव्यायामशांतये॥तमोधृतमःकृष्णायथार
क्षोनिहन्तये॥४१॥तावन्मृत्युत्यजंलोकोमूकोविलुलिताशयः॥यावदेवानुसंधत्तेतृष्णाविषविषूचिकां॥४२॥लोकोयमखिलंदुःखंविचिंतयोज्झितयाश्र ३४

चि
ति॥तृष्णयाविषूकाभंगुरंखिन्नंसाध्यमाधिमुहिकथ्यते॥४३॥तृणपाषाणकाष्ठादिसर्वमाभिषशंकया॥आददानास्फुरत्यंतेतृष्णामहीहृदेयथा॥४४॥रोगा
र्तिरंगनातृष्णागंभीरमपिमानवं॥उत्तानतांनयत्याशुसूर्योशवइवांबुजं॥४५॥अंतःशून्योग्रंथिमत्योदीर्घस्वांकुरकंटकाः॥मुक्तामपिप्रियांनित्यंतृष्णावे
णुलताइव॥४६॥अहोबतमहाचित्रंतृष्णामपिमहाधियः॥दुश्छेदामपिकृंतंतिविवेकेनामलासिना॥४७॥नासिधारानवज्राचिर्नसायःकणार्चिषः॥
तथातीक्ष्णायथाह्लेस्तृष्णेयंहृदिसंस्थिता॥४८॥उज्वलासितनतीक्ष्णाग्रास्नेहदार्घदशापरा॥प्रकाशदाहदुःस्पर्शातृष्णादीपशिखाइव॥४९॥अपि
मेरुसमंप्राज्ञमपिशूरमपिस्थितं॥तृणीकरोतितृष्णैकानिमेषेणनरोत्तमं॥५०॥संस्तीर्णगहनाभीमाघनजालरजोमयी॥सांधकारेनिहारातृष्णाविंध्यम
हाटवी॥५१॥एकैवसर्वभुवनांतरलब्धलक्ष्यादुर्लक्ष्यनामुपगतैवबपुःस्थितैव॥तृष्णास्थिताजगतिचंचलवीचिमालेक्षीरोदकांबुनरलेपेयुरेवशक्तिः॥५२॥

॥इत्यार्षेमहारामायणेश्रीवाल्मीकीययोगवासिष्ठेवैराग्यप्रकरणेतृष्णाभंगोनामसप्तदशःसर्गः॥१७॥ ॥७॥श्रीरामउवाच॥अद्रौव्रतंत्रीगहनेविकारी
परित्यक्तवान्॥देहःस्फुरतिसंसारेसापिदुःखायकेवलं॥१॥अज्ञोपितज्ञस्तदशोवस्तुतात्मचमत्कृतिः॥युक्त्याभव्योप्यभव्योपिनजडोनापिचेतनः॥२॥जडाजडस्ये

मध्येदोलायितदुराशयः॥ अविवेकीविमूढात्मामोहमेवप्रयच्छति॥३॥स्तोकेनानंदमायातिस्तोकेनायातिखेदितां॥ नास्तिदेहसमःशोच्योनचोगुणबहिष्कृतः॥४॥आगमापायिनानित्यंदंतकेसरशालिना॥विकासस्मितपुष्पेणप्रतिक्षणमलंकृतः॥५॥भुजशाखोघनस्कंधोहृज्जन्तुमधुभस्थितिः॥ल
चनालिविलोकांतःशिरःपीवरहत्फलः॥६॥श्रवदंतरसग्रस्तमोहस्तपादसुपल्लवः॥गुल्मवान्कार्यसंघातोविहंगमनतास्पदः॥७॥श्रवोकर्णौतावेवदंतरसोक
ष्कुइकारव्योपक्षिणेा॥हासुपर्णेतिमंत्रप्रसिद्धोजीवेश्वररूपोविहंगमो॥८॥सन्नायोदेहवृक्षोयंजीवपांथगणास्पदः॥कस्यात्मीयःकस्यपरःआस्तांता
स्तेकिलात्मके॥९॥तातसंतरणार्थेनगृहीतायांपुनःपुनः॥नाविदेहलतायांचकस्यस्यादात्मभावना॥१०॥देहनाम्निवनेशून्येबहुगर्तसमाकुले॥तमू
रुहासंरव्यतरोविश्वासंकोधिगच्छति॥११॥मांसस्नायुवसास्थिचर्मिलेशरीरपटहेदृढे॥मार्जारवद्दंतातितिष्ठाम्यत्रगतध्वनौ॥१२॥संसाराटव्यसं
रूढोविलसच्चित्तमर्कटः॥चिंतामंजरिकारोदीर्घदुःखघुणक्षतः॥१३॥तृष्णाभुजगमीगेहंकोपकाकृतालयः॥स्मितपुष्पोद्गमःश्रीमोस्तुभा
शुभमहाफलः॥१३॥सुस्कंधोघोलताजालोहस्तस्तबकसुंदरः॥पवनस्पंदिताशेषस्वांगावयवपल्लवः॥१४॥सर्वेंद्रियखगाधारःसुजानुस्त

DR BHAU DAJI

भउन्नतः॥सरसन्नायायायुक्तःकामपांथनिषेवितः॥१५॥मूर्ध्नःसंजनितादीर्घशिरोरुहतृणावलिः॥अहंकारगृध्रकृतकुलायःसुषिरोदयः॥१६॥विछि
न्नवासनाजालमूलत्वाद्दुर्लवाकृतिः॥व्यायामविरसःकायपूक्षोयंनसुखायमे॥१७॥कलेवरमहंकारगृहस्थस्यमहागृहं॥लुठत्वभ्येतुवास्तेयंकिमनेन
मुनेमम॥१८॥पंक्तिवद्दंदशूकेंद्रियपशुचक्रतृष्णागृहांगनं॥रागरंजितसर्वांगंनेष्टंदेहगृहंमम॥१९॥एषास्थिकाष्ठसंघट्टपरिसंकटकोटरं॥आंत्ररज्जुभि
राबद्धंनेष्टंदेहगृहंमम॥२०॥प्रसरत्स्नायुतंत्रीकंरक्तांबुकृतकर्दमं॥जरामंकोलघवलंनेष्टंदेहगृहंमम॥२१॥चित्रभृत्यकृतानंतचेष्टावष्टब्धसंस्थि
ति॥मिथ्यामोहमहास्तूणंनेष्टंदेहगृहंमम॥२२॥दुःखार्भकशतार्कंरंसुखशय्यामनोरमं॥दुरीहादग्धदासीकंनेष्टंदेहगृहंमम॥२३॥मलाढ्यविष
यव्यूहभांडोपस्करसंकटं॥अज्ञानदारवलितंनेष्टंदेहगृहंमम॥२४॥गुल्फगुग्गुलविश्रांतजानूर्ध्वस्तंभमस्तमस्तकं॥दीर्घदोर्द्वारुसरटंनेष्टंदेह
गृहंमम॥२५॥प्रकटाक्षगवाक्षांतःक्रीडत्प्रज्ञागृहांगनं॥चिंतादुहितृकंब्रह्मन्नेष्टंदेहगृहंमम॥२६॥मूर्द्धजालादनच्छन्नंकर्णश्रीचंद्रशालिकं
॥जादीर्घोगुल्फनिर्व्यूहंनेष्टंदेहगृहंमम॥२७॥सर्वांगकुड्यसंघातघनरोमयवांकुरं॥संशून्यपटवद्वरंनेष्टंदेहगृहंमम॥२८॥नखोर्णनाभिनि

लयंसरमारणितांतरं॥ भोंकारकारिपवनंनेष्टंदेहगृहंगमं॥२९॥प्रवेशनिर्गमव्यग्रबालवेगमनातरं॥विततास्यगवाक्षंतन्नेष्टंदेहगृहंमम
॥३०॥जिह्मार्कटिकाक्रांतंवदनद्वारभीषणं॥दृष्टदंतास्थिशकलंनेष्टंदेहगृहंमम॥३१॥लक्ष्मुधालेपसर्पण्यत्रसंचारचंचलं॥मनः स
दारवुनोत्खातंनेष्टंदेहगृहंमम॥३२॥स्मितदीपप्रभाङ्गासिक्षणमानंदसुंदरं॥क्षणंव्याप्तंतमःपूरैर्नेष्टंदेहगृहंमम॥३३॥समस्तरोगायत
नंवलीपलितपत्तनं॥सवाधिसारगहनंनेष्टंदेहगृहंमम॥३४॥अस्थिस्थेलोभविषमाशून्यानिःसारकोटरा॥तमोगहनदीर्घकुंजानेष्टादेहा
टवीमम॥३५॥देहालयंधारयितुंनशक्रोमिमुनीश्वर॥पंकमग्नंसमुद्धर्तुंगजमल्पबलोयथा॥३६॥किंश्रियाकिंचराज्येनकिंकायेनकि
मीहितैः॥दिनैःकतिपयैरेवकालःसर्वंनिहंतिहि॥३७॥रक्तमांसमयस्यास्यसवाह्याभ्यंतरंमुने॥नाशैकधर्मिणोब्रूहिकोवर्कायस्यरम्य
ता॥३८॥मरणावसरेकायाजीवंनानुसरंतिये॥तेषुतातसुतभ्रेषुकोवास्यावद्धीमतां॥३९॥मत्तेभकर्णाग्रचलःकायोलंबांबुभंगुरः॥न
संत्यजतिमांयावत्तावदेनंत्यजाम्यहं॥४०॥पवनस्पंदतरलःपेलवःकायपल्लवः॥जर्जरस्तनुवृक्षश्चनेष्टोमेकदुनीरसः॥४१॥भुक्तापीत्वा ३५

चिरंकालंबालपल्लवपेलवं॥तनुतामेत्ययत्नेनविनाशमनुधावति॥४२॥तोन्येवसुखदुःखानिभावाभावमयान्यसो॥भूयोप्यनुभवान्कायःप्राक्तनो
हिनलज्जते॥४३॥सुचिरंप्रसुतांकृत्वासंसेव्यविभवश्रियं॥नोब्रूतेमेतिनस्थेर्यंकायःकिमितिपाल्यते॥४४॥जराकोलजरामेतिमृत्युकालेनया
मृतिं॥समएवाविशेषेतःकायोभागिदरिद्रयोः॥४५॥संसारोभोधिजठरेतृष्णाकुहरकांतरे॥सुप्तस्तिष्ठतिमुक्तेहोमूकोयंकायकच्छपः॥४६॥दृह
नैकार्थयोग्यानिकायकाष्ठानिभूरिशः॥संसाराब्धाविहोह्यंतेकेचिन्नेषुनरंविदुः॥४७॥दीर्घदौरात्म्यबलयानिपातपुलयातया॥नेदृहलतयाका
र्येकिंचिदस्तिविवेकिनः॥४८॥मज्जन्कर्दमकोशेषुस्फुटित्येवजरांगतः॥नज्ञायतेयात्यचिरात्कथंकेदृहदर्दुरः॥४९॥निसारसकलारंभाःकायाश्च
पल्लवायवः॥रजोमार्गेणगच्छंतोदृश्यंतेनेहकेनचित्॥५०॥वायोर्दीपस्यमनसोगच्छतोज्ञायतेगतिः॥आगच्छतश्चभगवंश्छरीरस्यकदाचन॥५१
॥बद्धास्थापेशरीरेषुबद्धास्थायेजगत्स्थितौ॥तान्मोहमदिरोन्मत्तान्धिग्धिगस्तुपुनःपुनः॥नाहंदेहस्तथेदेहोममनायमहंतया॥इतिविश्रांतचित्ता
येतेमुनेपुरुषोत्तमाः॥५२॥मानावमानवदुःखाबद्धाभमनोरमाः॥शरीरमात्रबद्धास्थंघ्नंतिदोषदृशोनरं॥५४॥शरीरश्वभ्रशायिन्यांपशाच्यांपेशा

लांगया॥ अहंकारचमत्कृत्याछलेनछलितावयं॥५५॥प्रत्यावराकीसर्ववकायबद्धास्थयानया॥मिथ्याज्ञानकुराक्षस्याछलिताकष्टमेकि॥५६॥नाकिंचिदपिदृश्येस्मिन्सत्यतेनहतात्मना॥चिरंदग्धशरीरेणजनताविप्रलभ्यते॥५७॥दिनैःकतिपयैरेवनिर्झरांबुकणोयथा॥ पतत्ययमयत्नेनजरठःकायपल्लवः॥५८॥कायोयमचिरायायोबुद्बुदोंबुनिधाविव॥व्यर्थकार्यपरावर्त्तेपरिस्फुरतिनिष्फलः॥५९॥मिथ्याज्ञा नविकोरास्मिन्स्वप्नसंभ्रमपत्तने॥कायेस्फुरतरायायेक्षणमास्थानमेद्विज॥६०॥नाडिस्फुरदभ्रेषुगंधर्वनगरेषुच॥स्थेर्यंयेनविनिर्णीतंसविश्व सितुविग्रहे॥६१॥सततभंगुरकार्यपरंपराविजयिजातजयंहदर्शनेषु॥प्रबलदोषमिदंतुकलेवरंतृणमिवाहमपोह्यसुखंस्थितः॥६२॥ ॥ इत्यार्षेश्रीवाल्मीकीयमहारामायणेयोगवासिष्ठैवैराग्यप्रकरणेकायजुगुप्सानामाष्टादशःसर्गः॥ ॥१८॥७॥श्रीरामउवाच॥लब्धापित रलाकारेकार्यभारतरंगिणि॥संसारसागरेजन्मबाल्यंदुःखायकेवलं॥१॥अशक्तिरापदस्तृष्णामृकतामूढबुद्धिता॥गृध्नुतालोलतादैन्यंसर्वं बाल्येप्रवर्त्तते॥२॥रोषरोदनरोद्रासुदैन्यजर्जरितासुच॥दशासुबंधनंबाल्यमालानंकरिणामिव॥३॥नमृतौनजरारोगेनचापदिनयौवनेतां ३७

श्चिंतानिविलंतंतिहृदयंशेशवेषुयाः॥४॥नियत्नजातिसमारंभःसर्वैरेवावयैरितः॥लोलबालसमाचारोमरणादपिदुःखदः॥५॥प्रतिबिंबघनाज्ञानं नानासंकल्पपेलवं॥बाल्यमालूनसंशीर्णमनःकस्यसुखावहं॥६॥जलवन्त्यनिलाजस्रजातभीत्यापदेपदे॥यद्भयंशेशवेबुद्ध्याकस्यापदिहतन् द्रवेत्॥७॥लीलासुदुर्विलासेषुदुरीहासुदुराशये॥परमंमोहमाधत्तेबालबलवदापतन्॥८॥विकल्पकल्पितारंभंदुर्विलासंदुरास्पदं॥शैशवंशासनायेवपु रुषस्यनशांतये॥९॥येदोषायेदुराचारादुःक्रमायेदुराधयः॥तेसर्वेसंस्थितावाल्येदुर्गर्तइवकोशिकाः॥१०॥बाल्यंरम्यमितिव्यर्थबुद्ध्यःकल्पयंतिये॥ तान्मूर्खपुरुषांस्त्यक्त्वानधिगच्छहतचेतनैसः॥११॥यत्रदोलास्फुरितमनःपरिस्फुरतिहृत्तिषु॥त्रैलोक्याभव्यमपितत्कथंभवतितुष्टये॥१२॥सर्वेषामेवसत्तानां सर्वावस्थाभ्यएवाहि॥मनश्चंचलतामेतिबाल्येदशागुणंमुने॥१३॥मनःप्रस्पंदेवचलंबाल्यंचचलतोवरं॥तयोःसंश्लिष्यतोस्नाताकश्चांतःकुचापले॥१४ ॥स्त्रीलोचनेस्तडित्पुंजैर्ज्वालाजालेस्तरंगकैः॥चापलैश्चास्तिनंब्रह्मंस्त्रैशवाकांतचेतसः॥१५॥शैशवंचमनश्चैवसर्वास्ववस्थासुतिष्ठतः॥भ्रातरावितवत्स्येतेसतनं भंगुरास्थिती॥१६॥सर्वाणिदुःखभूतानिसर्वेदोषादुराधयः॥बालमेवोपजीवंतिश्रीमंतमिवमानवाः॥१७॥नवंनवंप्रीतिकरंनशाश्वःप्रत्यहंयदि॥प्राप्नोतिनदसोथा

तिविषवेषम्यमूर्छनां॥१८॥स्तोकेनवशमायातिस्तोकेनैतिविकारितां॥अमेध्यएवरमतेबालःकोलेयकोयथा॥१९॥अजस्रबाष्पवदनःकर्दमाक्तोजडाश
यः॥वर्षोक्षितस्यतत्तस्यस्थलस्यसदृशःशिशुः॥२०॥भयाहारपदंदीनंदृष्टादृष्टाभिलाषिच॥लोलबुद्धिर्वपुर्धत्तेबाल्यंदुःखायकेवलं॥२१॥स्वसंकल्पा
भिलषितांश्चभावनाप्राप्यतत्तथीः॥दुःखमेत्यबलोबालोविनिष्कृतइवाशयः॥२२॥दुरीहालक्ष्यलक्षाणिबहुवक्रोत्वणानिच॥बालस्ययान्तिदुःखानि
मुनेतानिनकस्यचित्॥२३॥बालोबलवतास्वेनमनोरथविलासिना॥मनसातप्येतेनित्यंग्रीष्मेणेववनस्थली॥२४॥विद्यागृहगतोबालोपरामेतिकद
र्थनां॥आत्मानइवनोगंद्रोविषवेषम्यभीषणं॥२५॥नानामनोरथमयीमिथ्याकल्पितकल्पना॥दुःखायात्यंतदीर्घायबालतापेलवाशया॥२६॥संदृष्टो
भुवनंभोक्तुमिंद्रादुमादातुमंबरात्॥वांछतेयेनमोर्ख्येणतत्कष्टंखायकथंभवेत्॥२७॥अतश्चितेरशक्तस्यशीतातपनिवारणे॥कोविशेषोमहाबुद्देर्बालस्यावि
रुहस्तथा॥२८॥उड्डीतुमभिवांछंतिपक्षाभ्यांक्षुत्परायणाः॥भयाहारपरानित्यंबालाविहगधर्मिणः॥२९॥शैशवेगुरुतोभीतिर्मान्तरःपित्ततस्तथा॥जनतोज्येष्ठ
